শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

॥শ্রী-কামাসিকাষ্টকম্ ॥

This document[*] has been prepared by

Sunder Kidambi

with the blessings of

শ্রী রঙ্গরামানুজ মহাদেশিকন্

His Holiness *śrīmad āṇḍavan* of *śrīraṅgam*

[*]This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

॥ শ্রী-কামাসিকাষ্টকম্ ॥

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রুতীনামুত্তরং ভাগং ৱেগৱত্যাশ্চ দক্ষিণম্।
কামাদধিৱসন্ জীযাত্ কশ্চিদদ্ভুত কেসরী॥ ১ ॥

তপনেন্দ্বগ্নি নযনঃ তাপানপচিনোতু নঃ।
তাপনীয রহস্যানাং সারঃ কামাসিকা হরিঃ॥ ২ ॥

আকণ্ঠমাদিপুরুষং
কণ্ঠীরৱমুপরি কুণ্ঠিতারাতিম্।
ৱেগোপকণ্ঠ সঙ্গাত্
ৱিমুক্ত ৱৈকুণ্ঠ বহুমতিমুপাসে॥ ৩ ॥

বন্ধুমখিলস্য জন্তোঃ
বন্ধুর পর্যঙ্ক বন্ধ রমণীযম্।
ৱিষম ৱিলোচনমীডে
ৱেগৱতী পুলিন কেলি নরসিংহম্॥ ৪ ॥

স্ব স্থানেষু মরুদ্গণান্ নিযমযন্ স্বাধীন সর্ৱেন্দ্রিযঃ
পর্যঙ্ক স্থির ধারণা প্রকটিত প্রত্যঙ্মুখাৱস্থিতিঃ।
প্রাযেণ প্রণিপেদুষাং প্রভুরসৌ যোগং নিজং শিক্ষযন্
কামানাতনুতাত্ অশেষ জগতাং কামাসিকা কেসরী॥ ৫ ॥

ৱিকস্বর নখ স্বরু ক্ষত হিরণ্য ৱক্ষঃ স্থলী
নিরর্গল ৱিনির্গলদ্রুধির সিন্ধু সন্ধ্যাযিতাঃ।
অৱন্তু মদনাসিকা মনুজ পঞ্চ ৱক্ত্রস্য মাম্
অহংপ্রথমিকা মিথঃ প্রকটিতাহৱা বাহৱঃ॥ ৬ ॥

সটা পটল ভীষণে সরভসাট্টহাসোদ্ভটে
স্ফুরতক্রুধি পরিস্ফুটদ্ ভ্রুকুটিকেপি ৱক্ত্রে কৃতে।

কৃপা কপট কেসরিন্ দনুজ ডিম্ভ দত্ত স্তনা
    সরোজ সদৃশা দৃশা ৱ্যতিভিষজ্য তে ৱ্যজ্যতে॥ ৭ ॥

ত্বযি রক্ষতি রক্ষকৈঃ কিমন্যৈঃ
    ত্বযি চারক্ষতি রক্ষকৈঃ কিমন্যৈঃ।
ইতি নিশ্চিত ধীঃ শ্রযামি নিত্যং
    নৃহরে ৱেগৱতী তটাশ্রযং ত্বাম্॥ ৮ ॥

ইত্থং স্তুতঃ সকৃদিহাষ্টভিরেষ পদ্যৈঃ
    শ্রীৱেঙ্কটেশ রচিতৈস্ত্রিদশেন্দ্র ৱন্দ্যঃ।
দুর্দান্ত ঘোর দুরিত দ্বিরদেন্দ্র ভেদী
    কামাসিকা নরহরির্ৱিতনোতু কামান্॥ ৯ ॥

॥ ইতি শ্রী-কামাসিকাষ্টকম্ সমাপ্তম্ ॥

কৱিতার্কিকসিংহায কল্যাণগুণশালিনে।
শ্রীমতে ৱেঙ্কটেশায ৱেদান্তগুরৱে নমঃ॥